# || श्री राम रक्षा स्तोत्र ||

Chalisamantras.com

विनियोग -
अस्य श्रीरामरक्षास्त्रोतमन्त्रस्य बुधकौशिक ऋषिः,
श्री सीतारामचंद्रो देवता,
अनुष्टुप छंदः, सीता शक्तिः,
श्रीमान हनुमान कीलकम,
श्री सीतारामचंद्रप्रीत्यर्थे रामरक्षास्त्रोतजपे विनियोगः ।

अथ ध्यानम् -
ध्यायेदाजानुबाहुं धृतशरधनुषं बद्धपदमासनस्थं,
पीतं वासो वसानं नवकमल दल स्पर्धिनेत्रम् प्रसन्नम,
वामांकारूढ़ सीता मुखकमलमिलल्लोचनम्नी,
रदाभम् नानालंकारदीप्तं दधतमुरुजटामण्डलम् रामचंद्रम ।

राम रक्षा स्तोत्र -
चरितं रघुनाथस्य शतकोटि प्रविस्तरम्,
एकैकमक्षरं पुंसां महापातकनाशनम् । 1 ।

ध्यात्वा नीलोत्पलश्यामं रामं राजीवलोचनम्,
जानकीलक्ष्मणोपेतं जटामुकुटमण्डितं । 2 ।

सासितूणधनुर्बाणपाणिं नक्तंचरान्तकम्,
स्वलीलया जगत्त्रातुमाविर्भूतमजं विभुम् । 3 ।

रामरक्षां पठेत प्राज्ञः पापघ्नीं सर्वकामदाम्,
शिरो मे राघवः पातु भालं दशरथात्मजः । 4 ।

कौसल्येयो दृशो पातु विश्वामित्रप्रियः श्रुति,
घ्राणं पातु मखत्राता मुखं सौमित्रिवत्सलः । 5 ।

जिह्वां विद्यानिधिः पातु कण्ठं भरतवन्दितः,
स्कन्धौ दिव्यायुधः पातु भुजौ भग्नेशकार्मुकः । 6 ।

करौ सीतापतिः पातु हृदयं जामदग्न्यजित,
मध्यं पातु खरध्वंसी नाभिं जाम्बवदाश्रयः । 7 ।

सुग्रीवेशः कटी पातु सक्थिनी हनुमत्प्रभुः,
उरु रघूत्तमः पातु रक्षःकुलविनाशकृताः । 8 ।

जानुनी सेतुकृत पातु जंघे दशमुखांतकः,
पादौ विभीषणश्रीदः पातु रामअखिलं वपुः । 9 ।

एतां रामबलोपेतां रक्षां यः सुकृति पठेत,
स चिरायुः सुखी पुत्री विजयी विनयी भवेत् । 10 ।

पातालभूतल व्योम चारिणश्छद्मचारिणः,
न द्रष्टुमपि शक्तास्ते रक्षितं रामनामभिः । 11 ।

रामेति रामभद्रेति रामचंद्रेति वा स्मरन,
नरौ न लिप्यते पापैर्भुक्तिं मुक्तिं च विन्दति । 12 ।

जगज्जैत्रैकमन्त्रेण रामनाम्नाभिरक्षितम्,
यः कण्ठे धारयेत्तस्य करस्थाः सर्वसिद्धयः । 13 ।

वज्रपञ्जरनामेदं यो रामकवचं स्मरेत,
अव्याहताज्ञाः सर्वत्र लभते जयमंगलम् । 14 ।

आदिष्टवान् यथा स्वप्ने रामरक्षामिमां हरः,
तथा लिखितवान् प्रातः प्रबुद्धो बुधकौशिकः । 15 ।

Chalisamantras.com

आरामः कल्पवृक्षाणां विरामः सकलापदाम्,
अभिरामस्त्रिलोकानां रामः श्रीमान स नः प्रभुः । 16 ।

तरुणौ रूपसम्पन्नौ सुकुमारौ महाबलौ,
पुण्डरीकविशालाक्षौ चीरकृष्णाजिनाम्बरौ । 17 ।

फलमूलाशिनौ दान्तौ तापसौ ब्रह्मचारिणौ,
पुत्रौ दशरथस्यैतौ भ्रातरौ रामलक्ष्मणौ । 18 ।

शरण्यौ सर्वसत्वानां श्रेष्ठौ सर्वधनुष्मताम्,
रक्षःकुलनिहन्तारौ त्रायेतां नो रघूत्तमौ । 19 ।

आत्तसज्जधनुषाविषुस्पृशा वक्ष याशुगनिषङ्गसङ्गिनौ,
रक्षणाय मम रामलक्ष्मणावग्रतः पथि सदैव गच्छताम । 20 ।

सन्नद्धः कवची खड्गी चापबाणधरो युवा,
गच्छन् मनोरथान नश्च रामः पातु सलक्ष्मणः । 21 ।

रामो दाशरथी शूरो लक्ष्मणानुचरो बली,
काकुत्स्थः पुरुषः पूर्णः कौसल्येयो रघूत्तमः । 22 ।

वेदान्तवेद्यो यज्ञेशः पुराणपुरुषोत्तमः,
जानकीवल्लभः श्रीमानप्रमेयपराक्रमः । 23 ।

इत्येतानि जपन नित्यं मद्भक्तः श्रद्धयान्वितः,
अश्वमेधाधिकं पुण्यं सम्प्राप्नोति न संशयः । 24 ।

रामं दुर्वादलश्यामं पद्माक्षं पीतवाससम,
स्तुवन्ति नामभिर्दिव्यैर्न ते संसारिणो नरः । 25 ।

Chalisamantras.com

रामं लक्ष्मणपूर्वजं रघुवरं सीतापतिं सुन्दरं,
काकुत्स्थं करुणार्णवं गुणनिधिं विप्रप्रियं धार्मिकम,
राजेन्द्रं सत्यसंधं दशरथतनयं श्यामलं शांतमूर्तिं,
वन्दे लोकाभिरामं रघुकुलतिलकं राघवं रावणारिम । 26 ।

रामाय रामभद्राय रामचंद्राय वेधसे,
रघुनाथाय नाथाय सीतायाः पतये नमः । 27 ।

श्रीराम राम रघुनन्दनराम राम,
श्रीराम राम भरताग्रज राम राम,
श्रीराम राम रणकर्कश राम राम,
श्रीराम राम शरणं भव राम राम । 28 ।

श्रीराम चन्द्रचरणौ मनसा स्मरामि,
श्रीराम चंद्रचरणौ वचसा गृणामि,
श्रीराम चन्द्रचरणौ शिरसा नमामि,
श्रीराम चन्द्रचरणौ शरणं प्रपद्ये । 29 ।

माता रामो मत्पिता रामचन्द्रः स्वामी,
रामो मत्सखा रामचन्द्रः,
सर्वस्वं मे रामचन्द्रो दयालुर्नान्यं,
जाने नैव जाने न जाने । 30 ।

दक्षिणे लक्ष्मणो यस्य वामे च जनकात्मज,
पुरतो मारुतिर्यस्य तं वन्दे रघुनन्दनम् । 31 ।

लोकाभिरामं रणरंगधीरं राजीवनेत्रं रघुवंशनाथं,
कारुण्यरूपं करुणाकरं तं श्रीरामचन्द्रं शरणं प्रपद्ये । 32 ।

Chalisamantras.com

मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम,
वातात्मजं वानरयूथमुख्यं श्रीराम दूतं शरणं प्रपद्ये । 33 ।

कूजन्तं रामरामेति मधुरं मधुराक्षरम,
आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम । 34 ।

आपदामपहर्तारं दातारं सर्वसम्पदाम्,
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् । 35 ।

भर्जनं भवबीजानामर्जनं सुखसम्पदाम्,
तर्जनं यमदूतानां रामरामेति गर्जनम् । 36 ।

रामो राजमणिः सदा विजयते,
रामं रमेशं भजे रामेणाभिहता,
निशाचरचमू रामाय तस्मै नमः,
रामान्नास्ति परायणं परतरं,
रामस्य दासोस्म्यहं रामे चित्तलयः,
सदा भवतु मे भो राम मामुद्धराः । 37 ।

राम रामेति रामेति रमे रामे मनोरमे,
सहस्त्रनाम तत्तुल्यं रामनाम वरानने । 38 ।

Chalisamantras.com

Chalisamantras.com